| | (ख) | शल्यचिकित्सा | (4) सुश्रुत: |
| | (ग) | राजस्थानं | (3) पर्यटका: |
| | (घ) | सरस्वती | (1) पातु |
| | (ङ) | सत्यं, शिवं, सुन्दरम् | (2) राष्ट्रीय दूरदर्शनम् |

| | | 'क' | 'ख' |
|---|---|---|---|
| 2. | (क) | पातकम् | (4) यौतुकं |
| | (ख) | गीता | (1) श्रीकृष्ण: |
| | (ग) | राज्ञी | (5) हाडावती |
| | (घ) | भुशुण्डी | (3) कुँवर प्रताप: |
| | (ङ) | अगत्स्य: | (2) विद्युत्कोष: |

**(घ)** 1. **कारकस्य परिभाषा**—'क्रियाजनकत्वं कारकम्' अथवा 'क्रियां करोति निर्वर्तयति इति कारकम्।' अर्थात् य: क्रियां सम्पादयति अथवा यस्य क्रियया सह साक्षात् परम्परया वा सम्बन्धो भवति स: 'कारकम्' इति कथ्यते। (क्रिया को जो करता है अथवा क्रिया के साथ जिसका सीधा अथवा परम्परा से सम्बन्ध होता है, वह 'कारक' कहा जाता है।)

2. हरये भक्ति: रोचते।
3. बालकाय मोदकं स्वदते। चतुर्थी विभक्ति।
4. **करण कारक की परिभाषा**— 'साधकतमं करणम्' अर्थात् किसी क्रिया की सिद्धि में जो अत्यन्त सहायक होता है, उसे करण कारक कहते हैं। करण कारक में तृतीया विभक्ति आती है तथा कर्मवाच्य एवं भाववाच्य के कर्त्ता में भी तृतीया विभक्ति आती है।
5. 'कर्तृकरणयोस्तृतीया' अर्थात् करण कारक तथा कर्मवाच्य अथवा भाववाच्य के कर्त्ता कारक में तृतीया विभक्ति आती है।
6. **परिमाण मात्र में**—नाप या वजन का बोध कराने के लिए भी प्रथमा विभक्ति का प्रयोग किया जाता है। जैसे—द्रोण:, आढकम् आदि।

वचन मात्र में—एकवचन, द्विवचन और बहुवचन का ज्ञान कराने हेतु भी प्रथमा विभक्ति प्रयुक्त होती है, जैसे—एक:, द्वौ, बहव:, क्रमश: एकवचन, द्विवचन तथा बहुवचन हैं।

उदाहरण— छात्रा: कुत्र गच्छन्ति? (छात्र कहाँ जाते हैं?)

7. 'अधिशीङ्स्थासां कर्म' सूत्र के अनुसार 'अधि' उपसर्गपूर्वक शीङ् (सोना), स्था (ठहरना) एवं आस् (बैठना) धातु के आधार की कर्म संज्ञा होती है अर्थात् सप्तमी विभक्ति के अर्थ में द्वितीया विभक्ति होती है, जैसे— हरि: वैकुण्ठम् अधिशेते । (हरि वैकुण्ठ में सोते हैं।)

   यहाँ वैकुण्ठ में सप्तमी विभक्ति न होकर उक्त अधि उपसर्ग के प्रयोग के कारण द्वितीया विभक्ति ही हुई है। 'भूपति: सिंहासनम् अधितिष्ठति' । (राजा सिंहासन पर बैठता है।) अथवा 'भूपति: सिंहासनम् अध्यास्ते' । (राजा सिंहासन पर बैठता है।) इसी प्रकार के प्रयोग हैं।

8. 'रुच्यर्थानां प्रीयमाण:' अर्थात् रुच् (अच्छा लगना) अर्थ वाली धातुओं के साथ चतुर्थी विभक्ति होती है। जिसे कोई वस्तु अच्छी लगती है, उसमें चतुर्थी आती है और जो वस्तु अच्छी लगती है, उसमें प्रथमा ही आती है। जैसे —

   बालकाय मोदकं रोचते । (बालक को लड्डू अच्छा लगता है।)

9. नम: स्वस्ति, स्वाहा, स्वधा, अलं, वषट् के योग में चतुर्थी विभक्ति होती है जैसे-

   1. देशभक्तेभ्य: नम: । (देशभक्तों को नमस्कार।)
   2. प्रजाभ्य: स्वस्ति । (प्रजाओं को आशीर्वाद।)
   3. अग्नये स्वाहा । (देवताओं के लिए अग्नि में आहुति।)

10. 'येनाङ्गविकार:' अर्थात् जिस अंग विशेष से शरीर का विकार जाना जाता है, उस अंगवाचक शब्द में तृतीया विभक्ति होती है। जैसे —मोहन: कर्णाभ्यां बधिर: । (मोहन कानों से बहरा है।) अत: यहाँ तृतीया विभक्ति है।

●●

## अध्याय-6 धातुरूप प्रकरणम्

**(क)** 1. (ख) भवति 2. (घ) गमिष्यथ 3. (ग) अभाषावहि 4. (घ) सेवध्वे। 5. (क) अवदम्
6. (ग) नयन्ति 7. (क) क्रीडतम् 8. (ख) पिबथ: 9. (क) लिखे: 10. (ख) करवाणि

**(ख)** 1. गच्छति 2. अक्रीडताम् 3. वदिष्याव: 4. भवाम: 5. पचेयु:

**(ग)** 1. ✓ 2. ✗ 3. ✓ 4. ✗ 5. ✓

**(घ)**

| **'क'** | **'ख'** |
|---|---|
| (क) लिखति | (3) 'लट्' लकार |
| (ख) वयं | (4) पठाम: |
| (ग) विधिलिङ्लकार | (1) गच्छतु |
| (घ) 'लोट्' लकार उत्तम पुरुष | (2) शोभामहै |
| (ङ) विभक्तय: | (5) प्रथम पुरुष बहुवचन |

| **'क'** | **'ख'** |
|---|---|
| (क) मोदिष्यन्ते | (3) सेवामहे |
| (ख) पश्यसि | (1) सप्त भवन्ति |
| (ग) भव् + अ + ति | (4) भवति |

(घ) आत्मनेपदी (5) परस्मैपदी

(ङ) करिष्यथ: (2) द्विवचन

**(ङ)** 1. क्रियाया: मूलरूपं धातु: भवति। (क्रिया के मूलरूप की धातु होती है।)

2. नमेतम्।

3. धातुओं के रूप बनाने के लिए उनके साथ दो प्रकार के प्रत्यय लगाये जाते हैं- परस्मैपद और आत्मनेपद। कई धातु केवल परस्मैपद में, कई केवल आत्मनेपद में आती हैं और कई दोनों में आती हैं जो उभयपदी होती हैं ।

4. वर्तमानकालाय लट् लकारस्य प्रयोगं भवति। (वर्तमान काल के लिए लट्लकार का प्रयोग होता है।)

5. प्रथमपुरुष, द्विवचन, लङ्लकार।

6. धातु—क्रिया के मूल रूप को धातु कहते हैं। जैसे—भू, पठ्, गम्, नम्, दृश्, लभ् आदि।

7. क्रिया—धातु के साथ प्रत्यय लगाकर जो वाक्य में सहायक पद बनता है, उसे क्रिया कहते हैं।
जैसे—भव् + अ + ति: भवति। पठ् + अ + ति = पठति।

8. द्रक्षत:—तौ: द्राक्षाफलान् द्रक्षत:।
यच्छाम:—ते आम्रफलानि यच्छाम:।
अवदाम—सर्वे बालका: सत्यं अवदाम।

9. **'स्था' लृट् लकार (भविष्यत् काल)**

| **पुरुष** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथम | स्थास्यति | स्थास्यत: | स्थास्यन्ति |
| मध्यम | स्थास्यसि | स्थास्यथ: | स्थास्यथ |
| उत्तम | स्थास्यामि | स्थास्याव: | स्थास्याम: |

10. धातुओं के रूप प्राय: दस लकारों में बनते हैं, परन्तु उनमें निम्नलिखित पाँच लकार मुख्य हैं—
    1. लट् = वर्तमान काल के लिए।
    2. लङ् = भूतकाल के लिए।
    3. लृट् = भविष्यत् काल के लिए।
    4. विधिलिङ् = सम्भावना या चाहिए वाले प्रेरणार्थक वाक्य के लिए ।
    5. लोट् = आज्ञा देने या माँगने तथा आशीर्वाद के लिए।

## अध्याय-7 उपसर्ग–प्रकरणम्

**(क)** 1. (घ) प्र 2. (ग) प्र 3. (घ) आ 4. (क) अ 5. (ख) वि
6. (घ) वि 7. (क) उप 8. (ग) नि 9. (क) उप 10. (ग) परि

**(ख)** 1. अवगच्छन्ति 2. प्रहार: 3. उपगच्छति 4. समागच्छत् 5. उन्नति:

**(ग)** 1. ✓ 2. ✓ 3. ✗ 4. ✓ 5. ✓

**(घ)**

| **'क' खण्डम्** | **'ख' खण्डम्** |
|---|---|
| (क) उपसर्ग: | (घ) क्रियायोगे |
| (ख) उपसर्गात् | (च) नूतनक्रियापदानांनिर्माणं |

| | |
|---|---|
| (ग) सम+ह | (ग) संहार |
| (घ) उपसर्गाः | (क) द्वाविंशति संख्यकाः |
| (च) अनु | (ख) करोति |

**(ङ)** 1. नूतनक्रियापदानांनिर्माणं धातोपूर्वम् उपसर्गानां योजयित्वा भवति। (नए क्रिया पदों का निर्माण धातु से पूर्व उपसर्ग जोड़कर होता है।)

2. धातोः पूर्वम् उपसर्गान् योजयित्वा वयं नूतनक्रियापदानां निर्माणं कुर्मः। (धातु से पहले उपसर्गों को जोड़कर हम नये क्रियापदों का निर्माण करते हैं ।) सूत्र– "उपसर्गः क्रियायोगे" अर्थात् क्रिया के योग में उपसर्ग संज्ञा होती है ।

3. प्रहारः।

4. मोहनः राजेशस्य पराभवति।

5. निपतति (नीचे गिरता है।)

6. **उपसर्गगतिस्त्रिधा**—उपसर्ग का प्रयोग करने से धातु के अर्थ में विशेषता आ जाती है । कहीं धातु का अर्थ परिवर्तित होकर एक नया अर्थ प्रकट करता है तो कहीं अर्थ का विपर्यय या विलोम हो जाता है और इस प्रकार अर्थ में सौन्दर्य आ जाता है। उपसर्ग का प्रयोग करने से धातु का अर्थ बलपूर्वक बदल जाता है। जैसे- विहार, परिहार, संहार, प्रहार तथा हार आदि।

7. **उपसर्ग की परिभाषा** — वे शब्दांश जो किसी क्रिया से पहले जुड़कर उसके अर्थ में परिवर्तन कर देते हैं या उसमें सुन्दरता ला देते हैं, उपसर्ग कहलाते हैं ।

8. प्रयोगः—सपादद्वि नक्षत्राणां मेलनं कृत्वा एकस्या राशेः प्रयोगं भवति।
परिभ्रमन्—एकस्मिन् वर्षे सूर्यः सप्तविंशति नक्षत्रेषु परिभ्रमति।
आगच्छति—श्रृगालः आगच्छति।

9. प्रमादम्—प्र। विकारम्—वि। अपहरति—अप। परिश्रमः—परि। प्रयुक्तान्—प्र। समागत्य—सम् + आ। उपविशति— उप

10. उपसर्गाः साधारणतः द्वाविंशतिः (22) संख्यकाः सन्ति, तद्यथा (साधारणतः उपसर्ग 22 होते हैं, जो इस प्रकार हैं)—प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, (आ), नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप।

●●

# अध्याय-8 प्रत्यय-प्रकरणम्

**(क)** 1. (क) क्त्वा 2. (ख) क्तवतु 3. (ख) ल्यप् 4. (ख) क्तवतु 5. (ख) ल्यप्
6. (ख) क्त्वा

**(ख)** 1. पीत्वा 2. पठन् 3. लिखितम् 4. रचितवान् 5. वक्तव्यम्।

**(ग)** 1. ✓ 2. ✓ 3. ✗ 4. ✗ 5. ✓

**(घ)**

| **'क'** | **'ख'** |
|---|---|
| (क) 'कृ' + क्त्वा | 4. कृत्वा |
| (ख) 'शतृ' प्रत्ययस्य रूपं | 2. पिवन् |
| (ग) क्त प्रत्ययः | 5. भाववाच्ये |
| (घ) कृत् प्रत्ययः | 3. तुमुन् |
| (च) प्रत्यय प्रयोगः | 1. शब्दस्य पश्चात् |

(ङ) 1. तुमुन् प्रत्ययस्य प्रयोगः अस्ति।

2. प्रत्यय मुख्यतः दो प्रकार के होते हैं—(1) कृत् प्रत्यय (2) तद्धित प्रत्यय।

3. नी + क्त्वा = नीत्वा। पी + क्त = पीतः। दा + तुमुन् = दातुम्।

4. क्तवतु प्रत्यय कर्तृवाच्य में होता है। 'क्तवतु' प्रत्यय में से 'क्' तथा 'उ' का लोप हो जाता है तथा तवत् शेष रहता है।

5. 'आनीय' शब्द में अनीयर् प्रत्यय का प्रयोग है।

6. **प्रत्यय**—जो शब्द किसी संज्ञा, सर्वनाम, विशेषण अथवा धातु (क्रिया) शब्द के पश्चात् (अन्त में) किसी विशेष अर्थ को व्यक्त करने के लिए जोड़ा जाता है, उसको 'प्रत्यय' कहते हैं।

7. मूल क्रिया (धातु) शब्द के बाद में भिन्न-भिन्न अर्थों का बोध कराने वाले जिन प्रत्ययों को जोड़कर संज्ञा, विशेषण, अव्यय तथा कहीं-कहीं क्रियापद का निर्माण किया जाता है, उन प्रत्ययों को 'कृत्' प्रत्यय कहते हैं।
कृत् प्रत्ययों में 'क्त्वा', 'ल्यप्' एवं 'तुमुन्' आदि प्रत्यय आते हैं।

8. पृच्छ् + क्त्वा—पृष्ट्वा। गम् + ल्यप् — आगम्य।
स्था + क्त — स्थितः। ह्रस्व + शतृ — ह्रस्वन्।
पठ + क्तवतु — पठितवान्। जन् + शानच् — जायमानः।
क्षम् + तव्यत् — क्षन्तव्यः। वन्द् + अनीयर् — वन्दनीयः।

9. दो की तुलना में एक की विशेषता बताने के लिए 'तरप्' प्रत्यय का प्रयोग किया जाता है। 'तरप्' का 'तर' शेष रहता है। 'तरप्' प्रत्यय से बने शब्द के रूप तीनों लिंगों में चलते हैं।

10. **'क्त'**

| **धातु** | | **अर्थ** | **धातु** | **प्रत्यय** | **क्त प्रत्यय से बना रूप** | **अर्थ** |
|---|---|---|---|---|---|---|
| गम् | = | जाना | गम् | + क्त | गतः | गया |
| पठ् | = | पढ़ना | पठ् | + क्त | पठितः | पढ़ा |
| आ + गम् | = | आना | आ + गम् | + क्त | आगतः | आया |
| दृश् | = | देखना | दृश् | + क्त | दृष्टः | देखा |
| कृ | = | करना | कृ | + क्त | कृतः | किया |
| आ + नी | = | लाना | आ + नी | + क्त | आनीतः | लाया |
| पा | = | पीना | पी | + क्त | पीतः | पिया |
| वच् | = | कहना | वच् | + क्त | उक्तः | कहा |
| हस् | = | हँसना | हस् | + क्त | हसितः | हँसा |
| नश् | = | नष्ट होना | नश् | + क्त | नष्टः | नष्ट हुआ |

**ल्यप्**

| **उपसर्ग** | | **धातु** | | **ल्यप् प्रत्यय** | | **ल्यप् प्रत्यय से बना रूप** | **अर्थ** |
|---|---|---|---|---|---|---|---|
| सम् | + | अस् (भू) | + | ल्यप् | = | संभूय | एकत्रित होकर |
| उप | + | कृ | + | ल्यप् | = | उपकृत्य | उपकार करके |
| सम् | + | क्रुध् | + | ल्यप् | = | संक्रुध्य | क्रोध करके |
| आ | + | गम् | + | ल्यप् | = | आगम्य | आकर |
| प्र | + | चल् | + | ल्यप् | = | प्रचल्य | चलकर |
| वि | + | जि | + | ल्यप् | = | विजित्य | जीतकर |

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| आ | + | दा | + | ल्यप् | = | आदाय | | लेकर |
| आ | + | नी | + | ल्यप् | = | आनीय | | लाकर |
| सम् | + | पठ् | + | ल्यप् | = | संपठ्य | | पढ़कर |
| सम् | + | प्रच्छ् | + | ल्यप् | = | संपृच्छ्य | | पूछकर |

**शतृ**

| **धातु** | | **अर्थ** | **धातु** | **प्रत्यय** | **बना रूप** | **अर्थ** |
|---|---|---|---|---|---|---|
| गम् | = | जाना | गम् | + शतृ | गच्छन् | जाते हुए |
| पठ् | = | पढ़ना | पठ् | + शतृ | पठन् | पढ़ते हुए |
| हस् | = | हँसना | हस् | + शतृ | हसन् | हँसते हुए |
| स्मृ | = | याद करना | स्मृ | + शतृ | स्मरन् | याद करते हुए |
| स्था | = | खड़ा होना | स्था | + शतृ | तिष्ठन् | खड़े होते हुए |
| कृ | = | करना | कृ | + शतृ | कुर्वन् | करते हुए |
| चल् | = | चलना | चल् | + शतृ | चलन् | चलते हुए |
| पृच्छ् | = | पूछना | पृच्छ् | + शतृ | पृच्छन् | पूछते हुए |
| पा | = | पीना | पा | + शतृ | पिबन् | पीते हुए |
| धाव् | = | दौड़ना | धाव् | + शतृ | धावन् | दौड़ते हुए |

**क्तवतु**

| **धातु** | | **अर्थ** | **पुल्लिंग** | **स्त्रीलिंग** | **नपुंसकलिंग** |
|---|---|---|---|---|---|
| गम् | = | जाना | गतवान् | गतवती | गतवत् |
| पठ् | = | पढ़ना | पठितवान् | पठितवती | पठितवत् |
| कृ | = | करना | कृतवान् | कृतवती | कृतवत् |
| ह | = | हरण करना | हृतवान् | हृतवती | हृतवत् |
| वच् | = | बोलना | उक्तवान् | उक्तवती | उक्तवत् |
| पा | = | पीना | पीतवान् | पीतवती | पीतवत् |
| प्रच्छ् | = | पूछना | पृष्टवान् | पृष्टवती | पृष्टवत |
| नी | = | ले जाना | नीतवान् | नीतवती | नीतवत् |
| कथ् | = | कहना | कथितवान् | कथितवती | कथितवत् |
| जि | = | जीतना | जितवान् | जितवती | जितवत् |
| पूज् | = | पूजा करना | पूजितवान् | पूजितवती | पूजितवत् |

**शानच्**

| **धातु** | | **अर्थ** | **धातु** | **प्रत्यय** | **बना रूप** | **अर्थ** |
|---|---|---|---|---|---|---|
| भाष् | = | कहना | भाष् | + शानच् | भाषमाण: | कहता हुआ |
| कृ | = | करना | कृ | + शानच् | कुर्वाण: | करता हुआ |
| सेव् | = | सेवा करना | सेव् | + शानच् | सेवमान: | सेवा करता हुआ |
| एध् | = | बढ़ना | एध् | + शानच् | एधमान: | बढ़ता हुआ |
| लभ् | = | प्राप्त करना | लभ् | + शानच् | लभमान: | प्राप्त करता हुआ |
| जन् | = | पैदा होना | जन् | + शानच् | जायमान: | पैदा होता हुआ |
| सह् | = | सहन करना | सह् | + शानच् | सहमान: | सहन करता हुआ |
| ताड् | = | पीटना | ताड् | + शानच् | ताड्यमान: | पीटता हुआ |

| | | | | | | |
|---|---|---|---|---|---|---|
| शी | = | सोना | शी | + शानच् | शयानः | सोता हुआ |
| याच् | = | माँगना | याच् | + शानच् | याचमानः | माँगता हुआ |

**अनीयर्**

| **धातु** | | **अर्थ** | **धातु** | | **प्रत्यय** | **बना रूप** | **अर्थ** |
|---|---|---|---|---|---|---|---|
| गम् | = | जाना | गम् | + | अनीयर् | गमनीयम् | जाना चाहिए |
| कृ | = | करना | कृ | + | अनीयर् | करणीयम् | करना चाहिए |
| स्मृ | = | याद करना | स्मृ | + | अनीयर् | स्मरणीयम् | याद करना चाहिए |
| एध् | = | बढ़ना | एध् | + | अनीयर् | एधनीयम् | बढ़ना चाहिए |
| दृश् | = | देखना | दृश् | + | अनीयर् | दर्शनीयम् | देखने योग्य |
| सेव् | = | सेवा करना | सेव् | + | अनीयर् | सेवनीयम् | सेवा करने योग्य |
| अर्च् | = | पूजा करना | अर्च् | + | अनीयर् | अर्चनीयम् | पूजा करने योग्य |
| पूज् | = | पूजा करना | पूज् | + | अनीयर् | पूजनीयः | पूजा करने योग्य |
| वन्द् | = | वन्दना करना | वन्द् | + | अनीयर् | वन्दनीयः | वन्दना करने योग्य |

**तुमुन्**

| **धातु** | | **अर्थ** | **धातु** | | **प्रत्यय** | **बना रूप** | **अर्थ** |
|---|---|---|---|---|---|---|---|
| कृ | = | करना | कृ | + | तुमुन् | कर्त्तुम् | करने के लिए |
| पठ् | = | पढ़ना | पठ् | + | तुमुन् | पठितुम् | पढ़ने के लिए |
| हन् | = | मारना | हन् | + | तुमुन् | हन्तुम् | मारने के लिए |
| गम् | = | जाना | गम् | + | तुमुन् | गन्तुम् | जाने के लिए |
| श्रु | = | सुनना | श्रु | + | तुमुन् | श्रोतुम् | सुनने के लिए |
| सह् | = | सहन करना | सह् | + | तुमुन् | सोढुम् | सहन करने के लिए |
| स्मृ | = | याद करना | स्मृ | + | तुमुन् | स्मर्तुम् | याद करने के लिए |
| हृ | = | चुराना | हृ | + | तुमुन् | हर्तुम् | चुराने के लिए |
| चल् | = | चलना | चल् | + | तुमुन् | चलितुम् | चलने के लिए |
| कथ् | = | कहना | कथ् | + | तुमुन् | कथयितुम् | कहने के लिए |

**तमप्–** अल्पतमः, लघुतमः, पटुतमः, गुरुतमः, प्रियतमः, बुद्धिमत्तमः, अधिकतमः, निम्नतमः, मूर्खतमः, चतुरतमः।

**तव्यत्**

| **धातु** | | **अर्थ** | **धातु** | **प्रत्यय** | **बना रूप** | **अर्थ** | |
|---|---|---|---|---|---|---|---|
| कृ | = | करना | कृ | + | तव्यत् | कर्त्तव्यम् | करना चाहिए |
| सह् | = | सहन करना | सह् | + | तव्यत् | सोढव्यम् | सहन करना चाहिए |
| पठ् | = | पढ़ना | पठ् | + | तव्यत् | पठितव्यम् | पढ़ना चाहिए |
| गम् | = | जाना | गम् | + | तव्यत् | गन्तव्यम् | जाना चाहिए |
| हन् | = | मारना | हन् | + | तव्यत् | हन्तव्यः | मारने योग्य या मारना चाहिए |
| क्षम् | = | क्षमा करना | क्षम् | + | तव्यत् | क्षन्तव्यः | क्षमा करना चाहिए |
| एध् | = | बढ़ना | एध् | + | तव्यत् | एधितव्यम् | बढ़ने योग्य, बढ़ना चाहिए |
| नी | = | ले जाना | नी | + | तव्यत् | नेतव्यः | ले जाना चाहिए |
| वच् | = | कहना | वच् | + | तव्यत् | वक्तव्यम् | कहना चाहिए |
| भू | = | होना | भू | + | तव्यत् | भवितव्यम् | होना चाहिए |

**क्त**

| धातु | | अर्थ | धातु | प्रत्यय | क्त प्रत्यय से बना रूप | अर्थ |
|---|---|---|---|---|---|---|
| गम् | = | जाना | गम् | + क्त | गतः | गया |
| पठ् | = | पढ़ना | पठ् | + क्त | पठितः | पढ़ा |
| आ + गम् | = | आना | आ + गम् | + क्त | आगतः | आया |
| दृश् | = | देखना | दृश् | + क्त | दृष्टः | देखा |
| कृ | = | करना | कृ | + क्त | कृतः | किया |
| आ + नी | = | लाना | आ + नी | + क्त | आनीतः | लाया |
| पा | = | पीना | पी | + क्त | पीतः | पिया |
| वच् | = | कहना | वच् | + क्त | उक्तः | कहा |
| हस् | = | हँसना | हस् | + क्त | हसितः | हँसा |
| नश् | = | नष्ट होना | नश् | + क्त | नष्टः | नष्ट हुआ |

## अध्याय-9 अव्यय–निरूपणम्

**(क)** 1. (क) कदा 2. (घ) एव 3. (ग) न 4. (क) सर्वदा 5. (ख) कुत्र
6. (ख) एकदा 7. (घ) अद्य 8. (क) बहुधा 9. (घ) तदा 10. (ख) अधुना

**(ख)** 1. (ग) प्रति 2. (क) च 3. (क) अद्य 4. (क) अत्र 5. (ग) सदा

**(ग)** 1. ✓ 2. ✗ 3. ✗ 4. ✓ 5. ✓

**(घ)**

| 'क' | 'ख' |
|---|---|
| (क) अव्यय | 2. व्यय न भवति |
| (ख) क्रिया विशेषण | 1. अव्यय भेदः |
| (ग) सदृशं | 3. अव्यय |
| (घ) उपसर्ग | 5. त्रिषु लिंगेषु |
| (च) किल | 4. निपात |

**(ङ)** 1. सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्नव्येति तद्व्ययम् ।। व्यय शब्द का अर्थ है— जिसमें व्यय न हो। व्यय का अर्थ परिवर्तन होता है अर्थात् जिसमें कोई परिवर्तन या विकार न हो, जैसा का तैसा ही बना रहता है, उसे अव्यय कहते हैं।

2. **भेद**—अव्यय के निम्नलिखित चार भेद हैं—
   1. उपसर्ग—उपसर्ग 22 हैं।
   2. क्रियाविशेषण—जो शब्द क्रिया की विशेषता प्रकट करते हैं, उन्हें क्रिया विशेषण कहते हैं।
      जैसे— अत्र, तत्र, यत्र, बहुत्र, सर्वत्र, श्वः, ह्यः, अन्येद्युः, इदानीम्, तदानीम्, बहुधा, एकदा आदि।
   3. समुच्चयबोधक अव्यय—जो शब्द दो शब्दों, वाक्यों अथवा वाक्यांशों को जोड़ते हैं, उन्हें समुच्चयबोधक अव्यय कहते हैं।
      जैसे — यथा, तथा, किन्तु, परन्तु, च, तु, चेत्, अथवा, परंच, यदि, यावत्, तावत्, तदा, यदा आदि।
   4. विस्मयबोधक अव्यय—वाक्य में इन अव्ययों का प्रयोग करने पर कर्त्ता, क्रिया अथवा कर्म से कोई सम्बन्ध नहीं होता। ये शब्द मात्र मन के भावों को ही प्रकट करते हैं। प्रायः ये भय, क्रोध, विषाद, उन्माद, आश्चर्य,

दया आदि मनोभावों की अभिव्यक्ति करते हैं।

जैसे—अरे, ओह, आह, हन्त, हा, धिक् आदि।

नोट—किल, खलु, नूनम्, आदि अव्यय हैं, जिन्हें निपात भी कहते हैं।

3. एव।
4. निपात — निपात अव्यय का ही एक भेद है। प्रायः विस्मयादि बोधक अव्यय निपात होते हैं। उदाहरण—किल, खलु, नूनम् आदि अव्यय हैं, जिन्हें निपात भी कहते हैं।
5. साम्प्रतम् सा अत्र नास्ति।
6. क्रिया विशेषण—जो शब्द क्रिया की विशेषता प्रकट करते हैं, उन्हें क्रिया विशेषण कहते हैं।
   जैसे— अत्र, तत्र, यत्र, बहुत्र, सर्वत्र, श्वः, ह्यः, अन्येद्युः, इदानीम्, तदानीम्, बहुधा, एकदा आदि।
7. समुच्चयबोधक अव्यय—जो शब्द दो शब्दों, वाक्यों अथवा वाक्यांशों को जोड़ते हैं, उन्हें समुच्चयबोधक अव्यय कहते हैं।
   जैसे — यथा, तथा, किन्तु, परन्तु, च, तु, चेत्, अथवा, परञ्च, यदि, यावत्, तावत्, तदा, यदा आदि।
8. 1. इत्थम् सः शान्तिं नालभत्। 2. यदा श्रीरामः आगच्छति तदा अहं गच्छामि।
   3. इदानीम् पठ। 4. अहं सर्वदा देवालयं गच्छामि।
9. विस्मयबोधक अव्यय—वाक्य में इन अव्ययों का प्रयोग करने पर कर्त्ता, क्रिया अथवा कर्म से कोई सम्बन्ध नहीं होता। ये शब्द मात्र मन के भावों को ही प्रकट करते हैं। प्रायः ये भय, क्रोध, विषाद, उन्माद, आश्चर्य, दया आदि मनोभावों की अभिव्यक्ति करते हैं।
   जैसे—अरे, ओह, आह, हन्त, हा, धिक् आदि।
10. अव्यय शब्द वे हैं जो कि तीनों लिंगों—पुल्लिग, स्त्रीलिंग और नपुंसक लिंग में, प्रथमा आदि सभी विभक्तियों में और तीनों वचनों—एकवचन, द्विवचन, बहुवचन इन सभी वचनों में समान रूप से प्रयुक्त होते हैं तथा जिनमें कोई परिवर्तन नहीं करना पड़ता है।

●●

## अध्याय-10 संख्यावाची शब्दः

**(क)** 1. (ख) एकोन पञ्चाशत् 2. (ख) चतुषष्टि 3. (ग) सप्तति 4. (क) अष्टाविंशः 5. (ख) त्रयशीति
6. (ख) द्विचत्वारिंशत् 7. (घ) चतुस्सप्तति 8. (ग) एकनवति 9. (क) सप्तदश 10. (घ) विंशतिः।

**(ख)** 1. द्वौ 2. एकः 3. सप्त 4. चतुर्थः 5. तृतीये

**(ग)** 1. ✓ 2. ✗ 3. ✓ 4. ✓ 5. ✓

**(घ)**

| 'क' | 'ख' |
|---|---|
| (क) अष्टाशीतिः | 4. 88 |
| (ख) अष्ट + अशीतिः | 5. 88 |
| (ग) एकस्मै | 3. एकस्याः |
| (घ) एकस्य | 2. चतुर्थी पुल्लिग |
| (ङ) नवविंशी | 1. छात्रा |

(ङ) 1. अष्टाशीतिः।

2. संस्कृत में संख्या को उल्टे क्रम से लिखना शुरू करते हैं । जैसे – 101 का पहले एक और फिर सौ को लिखेंगे, बीच में ज्यादा का शब्द 'अधिक' लिखेंगे। जैसे हमारे बुजुर्ग लोग गिनती बताते थे । 130 को = तीस ज्यादा सौ या तीस ऊपर सौ, 19 को = एक कम बीस, 540 को = चालीस ज्यादा पाँच सौ या चालीस ऊपर पाँच सौ' यही तरीका संस्कृत का है ।

3. 49, 16, 64, 97

4. शत, सहस्र, अयुत, प्रयुत।

5. 101, 165, 125

6. संस्कृत में संख्या उल्टे क्रम से लिखना शुरू करते हैं जैसे – 88 को लिखना है तो पहले इकाई अंक 8 की संस्कृत 'अष्ट' लिखेंगे बाद में 80 को 'अशीतिः लिखेंगे, दोनों को मिलाकर एक शब्द बनेगा 'अष्टाशीतिः'। इसी प्रकार 75 (पिचहत्तर) को लिखते समय पहले इकाई अंक 5 को संस्कृत में लिखकर पुनः 70 को संस्कृत में लिखेंगे तो शब्द सामने आयेगा 'पंचसप्ततिः'।

7. 5 पञ्च, 6. षट्, 7. सप्त, 8. अष्ट, 9. नव, 10. दश, 11. एकादश, 12. द्वादश, 13. त्रयोदश, 14. चतुर्दश, 15. पञ्चदश, 16 षोडश।

8. **त्रि ( तीन )**

| **विभक्ति** | **पुल्लिंग** | **स्त्रीलिंग** | **नपुंसकलिंग** |
|---|---|---|---|
| प्रथमा | त्रयः | तिस्रः | त्रीणि |
| द्वितीया | त्रीन् | तिस्रः | त्रीणि |
| तृतीया | त्रिभिः | तिसृभिः | त्रिभिः |
| चतुर्थी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| पंचमी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| षष्ठी | त्रयाणाम् | त्रिसृणाम् | त्रयाणाम् |
| सप्तमी | त्रिषु | तिसृषु | त्रिषु |

9. त्रिंशत् (तीस), चत्वारिंशत् (चालीस), पंचाशत् (पचास), षष्टिः (साठ), सप्ततिः (सत्तर), अशीतिः (अस्सी), नवतिः (नब्बे) आदि सभी शब्दों में 'तम' जोड़ने पर क्रमवाची शब्द बन जाते हैं ।
जैसे- त्रिंशत् से त्रिंशत्तमः (तीसवाँ), चत्वारिंशत् से चत्वारिंशत्तमः (चालीसवाँ), पंचाशत् से पंचाशत्तमः (पचासवाँ), षष्टिः से षष्टितमः (साठवाँ), सप्ततिः से सप्ततितमः (सत्तरवाँ), अशीतिः से अशीतितमः (अस्सीवाँ), नवतिः से नवतितमः (नब्बेवाँ), शतम् से शततमः (सौवाँ) इत्यादि क्रमवाची शब्द बनते हैं ।

10. प्रयुतम् = दस लाख। लक्षम् = लाख। कोटिः = करोड़। अब्ज = अरब।
खर्वन् = दस अरब। अर्बुदम् = दस करोड़। महापद्म = दस खरब। जलधि = दस नील।

●●

# अध्याय-11 सन्धि प्रकरणम्

(क) 1. (ब) दीर्घः 2. (ब) गुणः 3. (द) वृद्धिः 4 (अ) यण् 5. (अ) यण्
6. (स) वृद्धिः 7 (स) यण् 8. (स) अयादि 9. (अ) गुणः 10. (ब) अयादि

(ख) 1. हिम + आलयः 2. स्वर 3. रामः + चिनोति 4. पुरः + हित 5. व्यंजन संधेः

**(ग)** 1. ✓ 2. ✓ 3. ✗ 4. ✗ 5. ✓

**(घ)**

| **'क'** | **'ख'** |
|---|---|
| (क) पद्म | 3. आसना |
| (ख) वृद्धि रेचि | 5. एकैकम् |
| (ग) सोऽपि | 2. विसर्ग सन्धिः |
| (घ) सन्धिः | 1. वर्णमेलनं |
| (ङ) एकेन | 4. उक्तम् |

**(ङ)** 1. सन्धिः एकस्मिन् पदे धातूपसर्गयोः समासे च नित्य भवति। (सन्धि एक पद में, धातु और उपसर्ग में और समास की स्थिति में नित्य (अवश्य) होती है।)

2. स्वर वर्णेन सह स्वरवर्णस्य मेलनं स्वर-सन्धिः कथ्यते। (स्वर वर्ण के साथ स्वर वर्ण का मेल स्वर संधि कहलाती है।)
3. शश + अंक = शशांक।
4. स्वर वर्णेन सह स्वर वर्णस्य मेलनं स्वर सन्धिः कथ्यते। (स्वर वर्ण के साथ स्वर वर्ण का मेल स्वर संधि कहलाता है।
5. अकारान्त उपसर्ग के बाद 'ए', 'ओ' स्वर होने पर पूर्व अर्थात् उपसर्ग में आए हुए 'अ' का लोप होकर अर्थात् ए, ओ हो जाता है।
6 **परिभाषा**—पूर्व पदस्य अन्तिम वर्णेन सह उत्तरपदस्य पूर्व वर्णस्य मेलनेन यत्परिवर्तन भवति तत्सन्धिः इति। (पूर्व पद के अन्तिम वर्ण के साथ उत्तरपद के पहले वर्ण के मिलने से जो परिवर्तन होता है, वह सन्धि है।)
7 **परिभाषा**—सन्धि युक्त पद में दो या दो से अधिक शब्दों को अलग करना संधि विच्छेद कहलाता है। जैसे—'हिमालयः' का संधि-विच्छेद करने पर 'हिम + आलयः' ये दो शब्द अलग हो गये।
8. जलाधिपतिः = जल + अधिपतिः । धर्मसंस्थापनार्थाय = धर्मसंस्थापन + अर्थाय। रामष्टीकते = रामः + टीकते। पितुरिच्छा = पितुः + इच्छा।
9. अत्रागत्य। नरोत्तम । महर्षि । शयनम् । समुद्रमासाद्य।
10. विसर्ग (:) के साथ किसी स्वर या व्यंजन के मिलने से जो परिवर्तन (विकार) होता है, उसे विसर्ग संधि कहते हैं। उदाहरण— नमः + ते = नमस्ते। शिशु : + आगच्छत् = शिशुरागच्छत्।

●●

# अध्याय-12 निर्देशानुसार पद परिवर्तनम्

**(क)** 1. (क) कर्त्तुम् 2. (क) लिखित्वा 3. (क) पठितुम् 4. (क) दर्शनीय् 5. (घ) कुर्वाणः 6. (ख) हन्तुम् 7 (ख) मुदितः

**(ख)** 1. स्मृतिभ्रंशाद् बुद्धिनाशः भविष्यति।

2. परमाणुवादस्य जनकः महर्षि कणादः स्म।
3. अहं विवाहमपि न करिष्यामि।
4 बालकाः उद्याने क्रीडेत्।
5. यूयं विद्यालयं गच्छेत्।

6. गमिष्यति पिपीलिको योजनानां शतान्यपि यानि।
7. कति पुत्राः बुद्धि रहिताः आसन्?
8 राव रत्नसिंहस्य विवाह कस्य सह अभवत्?
9. प्राचीनकाले भारतदेश कैः आसन्?
10. कः सेवानिवृत्तः शिक्षकः अस्ति?
11. भ्रातुः कथनं श्रुत्वा कः मूकः जातः।

●●

# अध्याय-13 अनुवाद प्रकरणम्

- (1) मोहनः धावति। (2) बालकः पठति
  (3) त्वं पाठं स्मरसि। (4) त्वं किं पश्यसि?
  (5) सः स्नानम् अकरोत्। (6) रामः मोहनः च अपठताम्।
  (7) मुनिः तपः अकरोत्। (8) रामः पत्रम् अलिखत्।
  (9) प्रमिला भोजनं पक्ष्यति। (10) युवां दुग्धं पास्यथः।
  (11) पुत्रः जनकेन सह गमिष्यति। (12) बालकः पुस्तकानि गणयिष्यति।
  (13) राधा भोजनं पचतु। (14) युवां पाठं पठतम्।
  (15) त्वं मा हस। (16) वयं उद्यानं गच्छाम।
  (17) वयं प्रतिदिनं विद्यालयं गच्छेम। (18) ते ग्रामं न गच्छेयुः।
  (19) बालिका न हसेत्। (20) सः प्राज्ञस्य सम्मानं कुर्यात्।

- (1) राधा भोजन पकाती है। (2) छात्र देखता है।
  (3) तुम कब जाते हो? (4) तुम दोनों चित्र देखते हो।
  (5) वे दोनों बाग को गये। (6) सीता पानी लाई।
  (7) चोर धन चुरावेगा। (8) मैं तेरे साथ चलूँगा।
  (9) प्रमिला भोजन पकाएगी। (10) तुम दोनों दूध पियोगे।
  (11) पुत्र पिता के साथ जाएगा। (12) बालक पुस्तकें गिनेगा।
  (13) राजा धन दे। (14) ईश्वर जीवन बचाए।
  (15) वह कविता रचे। (16) तुम दोनों पत्र लिखो।
  (17) हमें विद्यालय रोजाना जाना चाहिए। (18) उन्हें गाँव नहीं जाना चाहिए।
  (19) बच्चों को भयभीत नहीं होना चाहिए। (20) तुम सभी को देश की रक्षा करनी चाहिए।

●●

# रचना

## अध्याय-14 पत्र लेखनम्

1. सेवायाम्,

श्रीमन्तः प्रधनाचार्य महोदयः,

राजकीयः उच्च माध्यमिक विद्यालयः,

दौसानगरम् ।

विषय-स्थानान्तरण-प्रमाण पत्रं प्राप्तुं प्रार्थना-पत्रम् ।

महोदयः,

सविनयं निवेदनम् अस्ति यत् मम पिता अत्र लिपिकः अस्ति । अधुना तस्य स्थानान्तरणं भरतपुरम् अभवत् । मम परिवारः मम पित्रा सह भरतपुरं गमिष्यति । अहम् अस्मात् विद्यालयात् सप्तकक्षाम् उत्तीर्णवान् अष्टककक्षायाम् अहं भरतपुरे पठिष्यामि। अतः मह्यं स्थानान्तरण-प्रमाण-पत्रं प्रदाय अनुग्रहीष्यन्ति भवन्तः इति ।

सधन्यवादम् ।

दिनांकः 15-7-20-- भवदाज्ञाकारी शिष्यः

रामकुमारः

(अष्टम् कक्षा)

2. सेवायाम्,

श्रीमन्तः प्रधानाध्यापक महोदयः,

रा. उ. प्रा. विद्यालयः, श्रीकरनपुर ।

विषयः- विद्यालये स्वच्छतायाः व्यवस्थायै प्रार्थना-पत्रम्।

महोदयाः,

सविनयं निवेदयामो यद् अस्माकं विद्यालये सम्प्रति अस्वच्छतायाः साम्राज्यं वर्तते । अस्मिन् वातावरणे छात्राः शिक्षकाश्च रोगग्रस्ता जायन्ते । अध्ययने अस्माकं मनांसि न रमन्ते । अतः कृपया स्वच्छतायाः समुचित-व्यवस्थायै कर्मकरान् प्रेरयन्तु अत्रभवन्तः ।

दिनांकः 28-8-20-- भवताम् आज्ञानुवर्ती

समस्तः छात्रवृन्दः

3. दिनाङ्कः 12-12-20--

प्रेषकः,

प्रधानाध्यापकः

राजकीय-उच्च-प्राथमिक विद्यालयः

सीकरम् ।

प्राप्तकर्ता

प्राचार्याः

गायत्री-कन्या-महाविद्यालयः

सीकरम् ।

महोदया:,

प्रसन्नताया: प्रसंगोऽयं यत्प्रतिवर्षमिव अस्मिन् वर्षेऽपि अस्माकं विद्यालयस्य वार्षिकोत्सव: 19-12-20-- दिनाङ्के बुधवासरे मध्याह्ने एकवादने विद्यालयस्य सभाभवने सम्पत्स्यते । अस्य मुख्यातिथय: क्षेत्रीया: विधायक महोदया: भविष्यन्ति।

अस्मिन् उत्सवे भवताम् उपस्थिति: सादरं प्रार्थ्यते ।

भवदीय:<br>(विजयानन्द:)<br>प्रधानाध्यापक

**4.** प्रेषक:<br>प्रह्लाद चावला, पार्षद:<br>सुभाषवसति: झालावाड़म् ।

प्राप्तकर्त्ता<br>श्रीमन्त: नगरपालिका प्रशासकमहोदय:<br>नगरपालिका, झालावाड़म्

विषय:– सुभाषवसत्या: स्वच्छता-सम्पादनार्थम् ।

महोदया:,

निवेदनमस्ति यद् अस्माकं 'सुभाषवसति' नाम्नि उपनगरे स्वच्छताकार्यं नैव क्रियते । अनेन कारणेन यत्र-तत्र अस्वच्छवस्तूनाम् अनियतप्रसरणं भवति । अनेन विविधरोगाणां प्रसारस्य आशंका अस्ति ।

अतएव प्रार्थ्यते स्वच्छताकार्ये नियुक्तान् कर्मकरान् स्वच्छतासम्पादनार्थम् आदिशतु । आशासे, भवान् समुचितां व्यवस्थां करिष्यति ।

निवेदक:<br>(प्रह्लाद चावला)<br>पार्षद:

**5.** सिरोहीत:<br>दिनांक: 17-10-20--

प्रिय सुहृन्महेन्द्रनाथ !<br>सप्रेम हरिस्मरणम् ।<br>अत्र कुशलं तत्रास्तु ।

तव स्नेह-पत्रं अद्यैव अधिगतम्। तव उत्साहवर्धकै: वचनै: अहम् अनुगृहीतोऽस्मि । त्वादृशानां मित्राणां प्रेरणैव मम सफलताया: कारणम् । अहं स्वाध्याये एकचित्तया संलग्नोऽहं पुनरपि श्रेष्ठां सफलतां प्रति आश्वस्तोऽस्मि । तव प्रगतिम् अनामयं च कामयन् ।

प्रतिष्ठायाम्, तव मित्रम्<br>श्री महेन्द्रनाथ:, जगन्नाथ:<br>माउण्ट आबू ।

●●

# अध्याय-15 निबन्ध लेखनम्

1. **उद्यानम्**

अस्माकं विद्यालयस्य समीपे एकम् उद्यानम् अस्ति। उद्याने अनेका: वृक्षा: वहु पादपानि च अपि सन्ति। अत्र एक: विशाल: वटवृक्ष: अपि तिष्ठति। तस्य शाखासु अनेका: खगा: कलरवं कुर्वन्ति। उद्याने पादपेषु पुष्पाणि विकसन्ति। जना: प्रात:काले उद्याने भ्रमणाय गच्छन्ति। प्रात:कालस्य भ्रमणं स्वास्थ्यवर्धकं भवति। सूर्योदय प्राक् उत्थाय प्रकोष्ठाय बहि: आगत्य उद्याने विचरणम् उत्तमा औषधि।

2. **संस्कृतभाषाया: महत्त्वम्**

संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति। प्राचीनकाले इयं जनसाधारणस्य भाषा आसीत्। तदा सर्वे जना: संस्कृतम् एव वदन्ति स्म। संस्कृतभाषा सर्वा: भाषा: शब्ददानेन पोषयति। अत: संस्कृतभाषा सर्वासां भाषाणां जननी अस्ति। भारतीया संस्कृति: अस्याम् एव भाषायां सुरक्षिता अस्ति। ये एतां 'मृतभाषा' इति कथयन्ति, ते एव मृता: सन्ति। ते अस्या: भाषाया: महत्त्वं न जानन्ति। अस्माकं वेदा:, पुराणानि, महाकाव्यानि अस्यां भाषायाम् एव सन्ति। अत: अस्माभि: अस्या: प्रचार: प्रसार: च कर्त्तव्य:।

3. **अस्माकं विद्यालय:**

अस्माकं विद्यालय: नगरात् बहि: रम्यप्रदेशे अस्ति। अस्य नाम राजकीय: आदर्श: माध्यमिक: विद्यालय: अस्ति। अस्माकं विद्यालये पञ्चदश: अध्यापका: पञ्चशत छात्रा: च सन्ति। सर्वे अध्यापका: विविध विषयेषु निपुणा: सन्ति। अध्ययने तत्परा: छात्रा: क्रीडायाम् अपि कुशला: सन्ति। कन्दुकक्रीडायाम् अस्माकं विद्यालय: प्रथम अस्ति। विद्यालयं परित: एकं रमणीयकम् उद्यानम् अस्ति। अस्माकं विद्यालये एक: विशाल: पुस्तकालय: अपि अस्ति। पुस्तकालये दशसहस्रपुस्तकानि सन्ति। अयं विद्यालय: साक्षात् विद्याया: मन्दिरम् एव अस्ति।

4. **होलिकोत्सव:**

भारतदेशे अनेके उत्सवा: भवन्ति। तेषु होलिकोत्सव: एक: प्रमुख: उत्सव: अस्ति। एष: हिन्दूनां प्रधानोत्सव: अस्ति। अयं फाल्गुनमासस्य पूर्णिमायां तिथौ मन्यते। प्रथमे दिवसे रात्रौ होलिकादाह: भवति। द्वितीये दिने जना: परस्परम् अबीरगुलालादीनि प्रक्षिपन्ति। अस्मिन् दिने गृहे गृहे विविधा: पाका: पच्यन्ते। पौराणिककथानुसारेण होलिका प्रह्लादम् आदाय अग्नौ अतिष्ठत्। ईश्वरेच्छया सा क्षणेन भस्मीसात् अभवत्। प्रह्लाद: तु सुरक्षित: एव अतिष्ठत्।

5. **मम प्रिय पुस्तकम्**

पुस्तकानि ज्ञानस्य निधय: भवन्ति । ज्ञानप्रदानेन सहैव एतानि अस्माकं मनोरंजनमपि कुर्वन्ति। प्रेरणादायकपुस्तकानि मह्यम् अतीव रोचन्ते। ईदृशमेव एकं पुस्तकं श्रीमद्भगवद्गीता अस्ति । अस्मिन् पुस्तके मानवमात्राय कल्याणसन्देश: निहित:। इदम् अस्मान् श्रेष्ठसफलजीवनस्य मार्गं दर्शयति । अत्र निहित: कर्मयोग: मानवान् उद्योगिन: करोति । अस्य अध्ययनं जनेषु कर्म प्रति रुचिं जनयति । स्वार्थहीनकर्मकरणेन मनुष्या: श्रेष्ठसन्तुष्टजीवनं यापयन्ति। एवम् इदं पुस्तकं सम्पूर्णं जीवनदर्शनम् अस्ति ।

6. **विद्याया: महत्वम्**

विद्या प्रधानं धनम् अस्ति। पुण्यं, पापम् इति ज्ञानं विद्यया एव भवति। स्वकर्तव्यज्ञानम् अपि विद्यया एव भवति। विद्या मनुष्याय विनयं ददाति। विनयात् मानव: पात्रतां याति। पात्रत्वात् च मनुष्य: धनं प्राप्नोति। विद्या मनुष्यस्य सुन्दरं रूपम् अस्ति। विद्यारहित: पुरुष: साक्षात् पशु: एव भवति। विद्या दानेन वर्धते संचयेन च नश्यति। अत: विद्या अपूर्वं श्रेष्ठं च धनम् अस्ति।

7. **सत्संगतिः**

सतां संगतिः 'सत्संगतिः' कथ्यते। ये परहितं कुर्वन्ति ते एव सज्जनाः सन्ति। मनुष्यः यादृशैः जनैः सह निवसति, सः तादृशः एव भवति। सत्संगतेः प्रभावेण दुर्जनाः अपि सज्जनाः भवन्ति। सत्संगत्या मानवः उन्नतिं लभते। सत्संगतिः यशसः विस्तारं करोति। पुरुषः सज्जनैः सह सज्जनः भवति, दुर्जनैः च सह दुर्जनः भवति। साधारणः पुरुषः अपि सतां संगत्या महान् भवति। सतां संगत्या अधार्मिकः अपि धार्मिकः, पापी अपि च पुण्यात्मा भवति। अतः सर्वदा सताम् एव संगतिः कार्या।

8. **रक्षाबन्धनम्**

रक्षाबन्धनं हिन्दूनां प्रधानमहोत्सवः अस्ति। अयं ब्राह्मणानां प्रमुखः उत्सवः अस्ति। एषः महोत्सवः श्रावणमासस्य पूर्णिमायां मन्यते। अस्मिन् दिने हिन्दुजनाः रक्षासूत्रं बध्नन्ति। वस्तुतः रक्षाबन्धनं रक्षायाः एव प्रतीकम् अस्ति। भगिन्यः भ्रातृगृहं गत्वा तेषाम् दक्षिणे हस्ते रक्षासूत्रंबध्नन्ति। भ्रातरः भगिनीभ्यः यथाशक्तिः दक्षिणां यच्छन्ति। अयम् उत्सवः भ्रातृभगिन्योः एव अस्ति। एतत् रक्षासूत्रं परस्परप्रेम्णः एकतायाः च सूचकम् अस्ति। वयं रक्षसूत्रस्य महत्त्वं ज्ञात्वा एकतायाः सूत्रो बद्धाः भवेम।

9. **दीपमालिका**

दीपावली हिन्दूनां प्रमुखः उत्सवः अस्ति। अयम् उत्सवः विशेषतया वैश्यानाम् उत्सवः अस्ति। दीपावल्याः उत्सवः कार्तिकमासस्य अमावस्यायां तिथौ भवति। जनाः पूर्वमेव स्वगृहाणि स्वच्छानि कुर्वन्ति। सर्वे स्वगृहेषु विविधाव्यञ्जनानि पचन्ति। रात्रौ लक्ष्म्याः गणेशस्य च पूजनं भवति। सर्वत्र दीपकानां पंक्ति अत्यधिकं शोभते। अस्मिन् दिने श्रीरामः रावणं हत्वा अयोध्याम् आगच्छत्। श्रीरामस्य स्वागतार्थं सर्वैः अयोध्यावासिभिः दीपाः प्रज्ज्वलिताः। इदम् एव अस्य उत्सवस्य विशेषता अस्ति।

10. **मम दिनचर्याः**

प्रत्येक मानवस्य दिनचर्या पृथक् भवति। अहम् एकः छात्रः अस्मि। अहम् अष्टम्–कक्षायां पठामि। अहं प्रतिदिन प्रातः पञ्चवादने उत्तिष्ठामि। अहं चषकमेकं चायं पिबामि। अहं स्वमित्ररामचन्द्रेण सह भ्रमणाय गच्छामि। भ्रमणानन्तरम् अहं स्नानं करोमि। स्नात्वा विद्यालयं गच्छामि। विद्यालये प्रार्थना–घण्टिकावादनं भवति। सर्वैः छात्रैः सह प्रार्थनां कृत्वा स्वकक्षायां प्रविशामि। तदनन्तरं कक्षायाम् अध्ययनं करोमि। अर्धावकाशे मित्रेण सह भोजन करोमि। पूर्णे अवकाशे जाते स्वगृहम् आगच्छामि। विश्रामं कृत्वा पाठशालायाः गृहकार्यं करोमि। सायंकाले अहं क्रीडामि। तदनन्तरम् अहम् अधीतपाठानां पुनः अभ्यासं करोमि। अहं भोजनं कृत्वा दूरदर्शनं पश्यामि। दशवादने शयनाय गच्छामि। एषा भवति मम दिनचर्या।

# अध्याय-16 कथा लेखनम्

1. एकस्मिन् वन **प्रदेशे** एकः लोमशः वसति स्म। एकदा असौ **भोजनस्य** अभावे बुभुक्षिता आसीत्। भोजनस्य अन्वेषणे सः वने **इतस्ततः** भ्रमन्नेव उद्याने अगच्छत्। तत्र एकां द्राक्षालताम् **अपश्यत्**। तस्यां लतायां **अनेकानि** सुपक्वानि द्राक्षा–फलानि आसन्। सः अति प्रसन्न अभवत्। सः उत्प्लुत्य **अनेकवारं** प्रायतत् परञ्च अति **दूरस्थात्** प्राप्तुम् असमर्थोऽभवत्। निराशायं लोमशा **प्रतिनिवृत्ता** अवदत्–नाहं खादानि द्राक्षाफलानि यतः इमानि अम्लानि सन्ति।
2. एकः **काकः** अस्ति। सः बहु **तृषितः** सः **जलार्थं** भ्रमति। तदा ग्रीष्मकालः कुत्रापि **जलं** नास्ति काकः **बहुदूरं** गच्छति। तत्र सः एकं **घटं** पश्यति। काकं अतीव **सन्तोषः** भवति। किन्तु घटे **स्वल्पम्** एव जलं अस्ति। जलं कथं पिबामि ? इति

काकः चिन्तयति। सः एकम् **उपायं** करोति। **प्रस्तरखण्डानि** आनयति। घटे पूरयति। जलम् **उपरि** आगच्छति। काकः सन्तोषेण जलं **पिबतिः** ततः गच्छति।

3. एकस्मिन् **ग्रामे** एकः कृषकः **प्रतिवसति** स्म। सः कुक्कुट- पालन करोति स्म। तस्य **कुक्कुटेषु** एक कुक्कुटी नित्यम् एकं **स्वर्णाण्डं** ददाति स्म। कृषकः अति **लुब्धः** आसीत्। सः एकदा एव **सर्वाणि** अण्डानि ग्रहीतुमैच्छत्। सः तस्या उदरं **व्यादारयत्** परञ्च तत्र **एकमपि** अण्डं न आसीत्। कुक्कुटी हता। कृषकोऽपि महद् **दुःखम्** अनुभवन् **पश्चात्तापम्** अकरोत्।

4. एकस्मिन् **वृक्षे** एकः काकः **वसति** स्म। एकदा सः एका **रोटिकाम्** आनयत्। एकः **लोमशः** तं दृष्ट्वा केनापि **उपायेन** तां रोटिकां **ग्रहीतुमैच्छतः** सः वृक्षस्य **अधस्तात्** अतिष्ठत् काकं च न्यवेदयत्-तात! मया **श्रुतम्** यत् त्वम् अति मधुरं गायसि। काकः आत्मनः **श्लाघां** श्रुत्वा प्रसन्नोऽभवत्। सगर्वोऽयं मूर्खः **काकः** यावत् **गायति** तावत् मुख विवृतात् **रोटिका** भूमौ अपतत्! लोमशः तां **नीत्वा** ततः पलायनम् अकरोत्। मूर्खः काकः तं पश्यन्नेव स्वमूर्खतायाः पश्चात्तापं करोति स्म।

5. कस्मिंश्चिद् वन **प्रदेशे** एकः मृगः **वसति** स्म। अहंकाराविष्टोऽयं स्वच्छन्दं **विचरति** स्म। एकदा असौ जले **स्वीकीयं** प्रतिबिम्बम् अपश्यत्। मनोहराणि **श्रृगाणि** अवलोक्य अति प्रसन्नोऽजायत्। परञ्च **अशोभनान्** पादान् **अवलोक्य** सः अति खिन्नो-अभवत् एकदा कोऽपि **वधिकः** तत्र आगच्छत्। तेन सह **कुक्कुराः** अपि आसन्। मृगः द्रुततराऽपि **द्रुतरमधावत्** परञ्च तस्य शृंगाणि वृक्ष **शाश्वासु** गुल्मेषु च संलग्नानि अभवन्। तेन असौ **धावने** असमर्थः अभवत्। तम् आक्रम्य कुक्करैः हतः।

6. कस्मिंश्चिद् वन-प्रदेशे एकः **सिंहः** प्रतिवसति स्म। एकदा सः **वृक्षस्य** छायायां **स्वपिति** स्म। तस्य वृक्षस्य **अधस्तात्** एकः मूषकः बिलं **कृत्वा** वसति। सः मूषकः बिलात् **निसृत्य** सुप्तस्य सिंहस्य **पृष्ठं** तस्य केशान् कृन्तति स्म। जागृतः सिंह मूषकं **हस्ते** गृहीत्वा अवदत्-कोऽसि? कथं मे **केशान्** कृन्तति? अहं त्वां **हनिष्यामि** । मूषकोऽपि भीतः सन् न्यवेदयत्-अहं छुद्रमूषकः सन् अपि **भवती** सहाय्यं कर्तुं प्रतिज्ञा करोमि। दयार्द्र सिंहः तम् उपहसन् अत्यजत्।

एकदा सिंह बधिकैः पाशे निबद्धः। स उच्चै **अगर्जत्**। मूषकः सिंहमापन्नं **ज्ञात्वा** तत्रैव प्राप्नोत्। सः तस्य जालं छित्वा तं पाश **बद्धं सिंह मुक्तम्** अकरोत्। मुक्तः सिंहः मूषकेन सह मैत्री **विधाय** स्वच्छन्दं विचरति स्म।

7. कस्मिंश्चिद् वन-प्रदेशे एकः **व्याघ्रः** वसति स्म। एकदा असौ **बधिकेन** पञ्जरे बद्ध। व्याघ्रः पाशे खिन्नः सन् स्थितः। ततोऽसौ मार्गे **विप्रमेकं** गच्छन्तम् अपश्यत्। व्याघ्रः **ब्राह्मणाय** न्यवेदयत्—'मां मोचय।' दयार्द्रः ब्राह्मणः व्याघ्रे **दयमानः** तं सहाय्यमकरोत्। परञ्च हिंसकः व्याघ्रः तु कृतघ्नः आसीत्। सः विप्रं **खादितुमैच्छत्** विप्र तं स्वजीवनं **याचमानः** न्यवेदयत्—'हे मृगराज! मा मां **व्यापदय** मां मा भक्षय। कृतज्ञो भव। परञ्च **निर्दयः** व्याघ्रः न श्रृणोत्। तदैव तत्र एकः **शृगालः** आगच्छत्। सोऽवद्त—नाहं मन्ये यत् त्वं **विशालकायः** अस्मिन् लघु पञ्जरे बद्धः आसीत्। अतः पुनः **प्रविश्य** मां दर्शय । व्याघ्रः यावत् पुनः प्रविश्य दर्शयति तावत् श्रृगालः **कपाटं** व्युपदयात्। एवं व्याघ्रं पञ्जरे पुनः निक्षिप्य विप्रं रक्षति।

8. कस्यचिद् **मनुष्यस्य** गृहे एक गर्दभः आसीत् । सः तस्य पृष्ठे **लवणस्य भारं धृत्वा** नयति स्म। सः सदैव नद्याः **पारं** नयति। एकदा **यदा सरितः जल मध्ये चलति स्म तदा** तस्य पादम् अस्खलत् सः जले अपतत्। लवणः जले **विलीयते** स्म। गर्दभः इदं तथ्यम् अजानत्। यत् यथा यथा लवणः जले विलीयते तथा तथा एव भारमपि **अल्पताम्** आप्नोति। एतद् ज्ञात्वा गर्दभः **नित्यमेव** सरितः जले पतति भारं च **अल्पतरम्** करोति। एकदा सः **मनुष्यः** तस्य पृष्ठे तूलं (कर्पासं) अनयत्। गर्दभः **नित्यमिव** जले अपतत्। जलं **संग्रहणात्** तूलस्य भारमतितरमभवत्। भारस्य आधिक्यात् गर्दभः **उत्थातुमपि** असमर्थो अभवत्। यत्नेन उत्थाय अपि **चलितुमसमर्थः** अजायत्। असमर्थो असौ भारेण **पीड़ितः** स्वामिना **प्रताडितः** ताडितः। वराकः गर्दभः धूर्तताम् अत्यजत्।

9. केनचिद् मनुष्येण **एकः** गजः पालितः आसीत्। सः जलं पातुं स्नातुं च नित्यमेव **नद्यास्तटं** गच्छति स्म। मार्गे एकस्य सौचिकस्य आपणि आसीत् । सः तस्मै किमपि **खादितुं** यच्छति स्म। सः वस्त्राणि सीव्यति स्म। आपणेऽनेकानि **स्यूतानि** वस्त्राणि अवलम्बितानि आसन्। एकदा **असौ** सौचिकः परिहासे गजस्य करे **सूचिम्** अभिनत्। क्रुद्धः सन् गजः नद्याः तटमगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकीये करे (शुण्डे) पङ्किलं जलमानयत्। **सौचिकस्यापणमागत्य** नव स्यूतेषु महार्धेषु वस्त्रेषु असिंचत्। **सौचिकः** किमपि न कर्तुमशक्नोत्। पश्चात्ताप **निमग्नोऽसौ** गजं क्षमामयाचत्। आत्मग्लानिमनुभूय **अति** खिन्नोऽभूत्।

10. एकः **शृगाल** आसीत्। सः वनम् उपवसति स्म। **माँस** लुब्धोऽसौ व्याधः एकदा धनुरादाय **मृगयार्थ** मृगमन्विष्यन् काननान्तरम् अगच्छत्। तत्र तेनैको मृगः व्यापादितः। मृगमादाय गच्छता तेन घोराकृतिः **शूकरो** दृष्टः। सः मृगं भूमौ निधाय शरेण शूकरमहनत्। शूकरः गर्जनं कुर्वाण **पादाघातेन** तमाहतवान्। व्याधः हतः छिन्न द्रुम इव पपात। तस्य पादस्खलितेन एक सर्पः अपि मृतः। मृते **व्याधे** तत्रागत एकः शृगालः। सः तान् **मृतानवलोक्य** प्रसन्नोऽभवत् । सोऽचिन्तयत—'अहो ! भाग्यम्, अद्य महद् भोजनं मे **समुपस्थितम्**। अद्य तु धनुलग्नं स्नायुबन्धनमेव खादामि।' एवं कुर्वन्नसौ छिन्ने **स्नायुबन्धने** द्रुतम् उत्प्लुतेन कोरण्डेन हृदिभिन्नः **शृगालः** पञ्चत्वं गतः।

●●

# अध्याय-17 चित्राधारित वर्णनम्

1. 1. अस्मिन् चित्रे वयम् एकं क्रीडाक्षेत्रं पश्यामः।
   2. अत्र त्रयः बालकाः कन्दुकेन क्रीडन्ति।
   3. क्रीडाक्षेत्रे प्रतिदिनं बालकाः क्रीडार्थम् आगच्छन्ति।
   4. बालकाः अत्र क्रीडित्वा अतिप्रसन्नाः भवति।
2. 1. कृषकः क्षेत्रेषु वृषभाभ्यां हल कर्षति।
   2. सः क्षेत्रेषु बीजानि वपति।
   3. बीजेभ्यः शस्यति उद्भवन्ति।
   4. यदा शस्यानि पक्वन्ति तदा कृषकः तानि कर्तति।
3. 1. इदं चित्रं शिशु-मात्रोः स्नेहस्य अस्ति।
   2. अत्र एकः शिशुः अस्ति।
   3. माता शिशुं स्नेहेन पश्यति।
   4. शिशुः मातुः अङ्के स्वपिति।
4. 1. इयं अस्माकं शिक्षिका अस्ति।
   2. सा शाटिकां धारयति।
   3. तस्याः व्यक्तित्वम् आकर्षकम् अस्ति।
   4. वयं सर्वे छात्राः तस्याः सम्मानं कुर्मः।
5. 1. अस्मिन् चित्रे मोहनः कार्यालयं गच्छति।
   2. सः ग्रामात् आगच्छति, तत्र सः परिवार जनैः सह निवसति।
   3. अस्मिन् ग्रामे बसयान न चलति यत अयं मार्गः रेणुपूर्णः अस्ति।

4. मार्गे बहवः पादपाः मिलन्ति।

**6.** 1. वृक्षाः अस्माकं मित्राणि सन्ति।
2. वृक्षैः पर्यावरणं शुद्धं भवति।
3. वृक्षारोपणम् अस्माकं कर्तव्यम्।
4. प्रतिवर्ष वर्षाकाले जनाः वृक्षारोपणं कुर्वन्ति।

**7.** 1. एतस्मिन् चित्रे एकः जलाशयः रमणीयः पर्वतः च स्तः।
2. जलाशयस्य तटे बहवः वृक्षाः सन्ति।
3. अत्र शीतलवायुः प्रवहति।
4. जलाशयस्य दृश्यं मनोरमम् अस्ति।

**8.** 1. अत्र बालः कुक्कुरेण सह खेलति उपविशति च।
2. बालः कुक्कुरं स्नेहेन पश्यति।
3. बालस्य शिरसि एका टोपिका: अस्ति।
4. बालकः प्रसन्नाः अस्ति।

**9.** 1. अस्मिन् चित्रे होलिकोत्सवः आयोज्यते।
2. अयं महापर्व फाल्गुनमासस्य पौर्णमास्या भवति।
3. अस्मिन् दिने जनाः रक्तपीतादि वर्णैः क्रीडन्ति, गायन्ति नृत्यन्ति।
4. जनाः परस्परं द्वेषं विस्मृत्य गलेन मिलन्ति।

**10.** 1. अद्य बालदिवसः अस्ति।
2. क्रीडाङ्गणे छात्राः कन्दुकेन क्रीडन्ति, धावन्ति च।
3. बाल दिवसे क्रीडाप्रतियोगिता वाद-विवाद प्रतियोगिता च भवति।
4. बालदिवसे सर्वे छात्राः आनन्दम् अनुभवन्ति।

## अध्याय-18 कथाक्रम-संयोजनम्

**1.** (i) माणिककँवर—अत्र कोलाहलं मा करोतु कुमार।
(ii) कुँवर प्रतापः—तात ! माता मह्यं भुशुण्डीं न ददाति।
(iii) माणिककँवरः—किमर्थम् अद्य अतीव गम्भीरो दृश्यते ?
(iv) केसरीसिंहः—महाराणा फतेहसिंहः देहल्यां लार्ड कर्जनस्य समारोहे भागं ग्रहीतुं गमिष्यति।

**2.** (i) विद्याधरः सेवानिवृत्तः शिक्षकः अस्ति।
(ii) अहम् विवाहमपि न करिष्यामि।
(iii) भवन्तः एव अस्माकं निबन्धने सन्ति।
(iv) एतत् तु अस्माकं सौभाग्यं अस्ति।

**3.** (i) जीर्णशीर्णै: वस्त्रैरावृत: कोऽपि मानव: मार्गे पतित:।

(ii) स: अन्ध पङ्गु चेतनाविहीनश्च आसीत्।

(iii) तस्य मस्तकम् अपि रुधिरक्लिन्नम् आसीत्।

(iv) नरेन्द्र: स्ववस्त्रेण तस्य मस्तके व्रणपट्टिकाम् अबध्नात्।

# अध्याय-19 सड़क सुरक्षा

**1. सडक-सुरक्षार्थं किं करणीयम् लिखत।**

**उत्तरम्**— राजमार्ग-सुरक्षार्थम् अस्माभि: सडक-सुरक्षा- नियमानां ज्ञानं प्राप्तव्यम्। राजमार्गम् उभयत: स्थापितानां यातायात-सङ्केतानाम् अभिज्ञानमपि करणीयम्। अल्पायुसि एव वाहन न चालयेत्। वाहन-सञ्चालन काले उच्च-स्वरेण सङ्गीत वर्जयेत्। मार्गे ध्यानं सर्वत: आकृष्य मार्गागतानि वस्तूनि एव न पश्येत्। नैतस्मिन् काले धूम्रपानं कुर्यान्न च चलदूरभाषे केनापि सह वार्तालापं कुर्यात्। सहयात्रिभि: सार्धमपि न संवदेत्।

**2. मार्गे दुर्घटनाया: कारणानि लिखत।**

**उत्तरम्**— सामान्यत: जना: यातायात-नियमेभ्य: अनभिज्ञा: भवानि। विज्ञा: अपि यातायात सङ्केतान् न पश्यन्ति। बहव: तु उपेक्षन्ते। जना: भूमिगतपदाति मार्गस्योपयोगमपि न कुर्वन्ति। निषेधेऽपि निषेध मार्गं प्रविशन्ति। वाहन चालक: समीपस्थै: जनै: सह, चल दूरभाषे च दत्तचित्ता: सन्त: वार्तालापं कुर्वन्ति। केचन तु उपहास-निमग्ना: परिवर्त्य पृष्ठ भागे पश्यन्ति सहयात्रिण:।

**3. सड़क सुरक्षा नियम-शिक्षणाय सरलतमा का व्यवस्था भवेत् ?**

**उत्तरम्**— गृहे परिजनै: विद्यालये च शिक्षकै: छात्रा: एतद्विषये प्रशिक्षणीया। प्रार्थना-सभायां समये-समये सडक सुरक्षा नियमानां ज्ञानं प्रदेयम्। भूगोलविषयाध्ययन काले विषयाध्यापकेन यथावसरं यातायात-सङ्केतानां मानचित्राध्ययनस्य परिचय: प्रदेय:। विद्यालये एतद्विषयक प्रश्न-पृच्छा-स्पर्धा अपि आयोज्या। वृत्तपत्रेषु सडक दुर्घटनाया: समाचारं श्रावयित्वा तं प्रति सावहितं कुर्यात् तेभ्य: च मार्ग-सञ्चरण नियम-ज्ञानपि पुन:-पुन: प्रदेयम्। एकस्मिन् सत्रे वारद्वयं सडक-सुरक्षा-नियमान् आधृत्य संवाद, वाद-विवाद, भाषणादीनां स्पर्धानामप्यायोजनं कुर्यात् विजेतारश्च पुरस्करणीया:।

**4. जन-सम्मर्दाकीर्णे मार्गे वाहन-चालकेन किं करणीयम्?**

**उत्तरम्**— सुसञ्चालनं विधाय वाहन चालक: दुर्घटनां परिहर्तुं शक्नोति। अत: सुसञ्चालक: जनसम्मर्दाकीर्णमार्गे वाहनं कदापि तीव्र गत्या न चालयेत। वाहनस्यगति: निर्धारिता निर्दिष्टा नियन्त्रिता च भवेत्। अपर्याप्तमपि मार्गं प्राप्य अग्रगमनस्य प्रयत्नं न कुर्यात्। द्रुत गमनमपि सदैव वर्जनीयम्। आगते गत्यावरोधके वाहनस्य गतिरपि अवरोधनीया। निर्दिष्टं मार्गमेवानुसरेत्।

**5. अधोदत्त यातायात-सङ्केतानां अभिप्रायमपि लिखत।** (नीचे दिये हुए यातायात के चिह्नों का अभिप्राय बताइये।)



**उत्तरम्**— (i) सङ्केतोऽयं सन्दशकावर्त (U-TURN) इति कथ्यते यन्निर्दिशति यदत्र व्यावर्तन निषिद्धम्।

(ii) सङ्केतोऽयं निर्दिशति यदत्र प्रवेश: निषिद्ध: अत: नात्र गन्तव्यम्।

(iii) ओवरटेक-निषेधकं चिह्नमुपदिशति यत्र अग्रगमन- प्रयत्नं निषिद्धम्।

**6. यदा चालकः सड़क-सुरक्षा नियमान् न पालयति तदा किं करणीयम्?**

**उत्तरम्**— यदा वाहन-चालकः सडक-सुरक्षा-नियमान् न पालयति तदा छात्रैः सः निरोधनीय, बोधनीयः विरोधनीयः। एषा उपेक्षा भावना च अवरोधनीया। तस्यायनुचित-व्यवहारस्य परिवादः विद्यालयस्याधिकारिणां समक्षे निवेदनीयः। अधिकारिभिः असौ सम्यक् निर्देष्टव्यः। यद्यसौ पुनरपि करोति तदा परिवर्तनीयः अन्यथा आरक्षि- स्थाने परिवादः प्रस्तोतव्यः सः यातायात- नियमानवगन्तु चं आदिष्टव्यः। छात्रैः शिक्षकैः अधिकारिभिश्चासौ उपेक्षणीयः।

**7. सड़क-सुरक्षार्थं बालकैः किं न करणीयम्?**

**उत्तरम्**— केचन छात्राः बालकाः व अल्पायुसि एव वाहन- चालनाय अत्युत्सुकाः भवन्ति। ते वाहन- चालनेऽनभिज्ञा अल्पज्ञाः वा सन्तोऽपि वाहनं नीत्वा राजमार्गे आगच्छन्ति। वाहन-चालनस्य प्रयत्न कुर्वन्ति एवं दुर्घटना सम्भवति अतोऽल्पायुसि बालकैः वाहन-चालन कार्यं न कुर्यात्। षोडशदेश वर्षीया बालकाः गियर (गतिपरिवर्तक) युक्त वाहनं न चालयेयुः। प्रशिक्षिताः अपि केचन बालकाः आत्मविश्वासस्य अभावे असावधानतया दुर्घटनां विदधति। अतः आत्मविश्वास न त्यजेत् परञ्च वाहने चलदूरभाषै सङ्गीतं चापि न श्रणुयु सहयात्रिणा सह वार्तालापमपि न कुर्युः।

**8. राजमार्ग सुरक्षायाः सामान्य नियमान् लिखत?**

**उत्तरम्**— राजमार्गस्य वामपार्श्वे एव चलेत्। व्यावर्तनेः चतुष्पथे, पदातिमार्गे, गत्यावरोधके च वाहनं शनैः शनैः चालयेत। उभयतः संलग्नयोः आदर्शयोः मार्गस्थितिं विचरन्तश्च जनान् पश्येत्। व्यावर्तने हस्त-सङ्केत कुर्यात्। द्विचक्रवाहन चालकेन शिरस्त्राणम् (हैलमेट) अवश्यनेन धारणीयम्। यातायात संकेतान् अवलोक्य अभिज्ञाय, तेषाम् अभिप्राय प्रयोजनं वा ज्ञात्वा अनुपालयेत् राजमार्गविभाजिका पीत रेखा नोल्लङ्घनीया। वाहनोऽकस्मात् नावरोधनीय। पश्चगमने आदर्शयो स्थितिं जन-सम्मर्द च पश्येत सावहितः सन् चालयेत्।

**9. प्रवेश-निषेध मार्गे गते का हानिर्भवति?**

**उत्तरम्**— 'प्रवेश निषेध' मार्गं न प्रविशेत्। यदि प्रविशति तदा किमपि दुर्घटितुं शक्यते। स्वस्यापरस्य व हानिर्भवितुं शक्नोति। तत्र नियुक्तः राज-पुरुषः निरोद्धं शक्नोति, वाहनस्य चालनं विधाय परिवादमपि आरब्धुं शक्नोति। अनेन आर्थिकहानिः तु भविष्यति एव मानसिक अशान्तिः अपि वर्धिष्यते। न्यायालयः दण्डयितु शक्नोति। अवमानना वाहनस्य क्षतिः सम्भवति वाहनमपि निरोद्धुं शक्यते। अतः प्रवेश निषेध मार्गे प्रविष्टेतु अपाय एव सम्भवति।

**10. राजमार्ग-सङ्केता कतिधा भवन्ति? लिखत।**

**उत्तरम्**— राजमार्ग सङ्केताः मुख्यतः चतुर्धाः भवन्ति। एतेषु प्रवेश-निषेधादयः पञ्चत्रिंशत सङ्केताः अनिवार्याः भवन्ति एते वृत्ताकारेऽङ्किताः भवन्ति। सचेतकाः सङ्केताः त्रिकोणात्मकाः अङ्किताः भवन्ति, एते व्यावर्तनादिबोधकाः चत्वारिंशत् भवन्ति। सूचना चिह्नाणि विद्यमानता बोधकानि पञ्चदश संख्यकानि भवन्ति। चतुर्थ-विद्या दश सङ्केताः यातायात-कर्मकरस्य हस्ताभ्यां सङ्केतिताः भवन्ति। चतुष्पथे पुलिस कर्मकारः स्व हस्तयोः मार्गं, व्यावर्तक मार्गस्य रिक्ततां व्यस्ततां च दर्शयति।

● ●